# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१)(New&Old)** | **प्रश्नपत्रम् – 3** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.4.1.2** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –11/10/2019 | सन्दर्भग्रन्थः – ध्वन्यालोकः प्रथमोद्योतः | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नलिखिताभ्याम् एकस्य ससन्दर्भं व्याख्या कार्या।** ५

१ भाक्तमाहुस्तमन्ये ।

२ तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः ।

**प्रश्न २** आचार्यानन्दवर्धनस्य संस्कृतसाहित्यशास्त्रे योगदानं लिखत। १०

अथवा

काव्यस्यात्मा ध्वनिः – इत्युक्तिं यथाग्रन्थं विवेचयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखिताभ्याम् एकस्याः कारिकायाः ससन्दर्भां व्याख्या कार्या।** ५

१ सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥

२ सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः।** १०

१ आनन्दवर्धनाचार्यस्य मतानुसारं प्रतीयमानार्थं विवेचयत।

२ आदिकवेः शोकः कथं श्लोकत्वमागतः यथाग्रन्थं विवेचयत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ निम्नलिखिताभ्याम् एकं ससन्दर्भं स्पष्टयत।** ५

१ यदप्युक्तम् – "प्रसिद्धप्रस्थानातिरेकिणो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्ति" इति तदप्यदुक्तम्।

२ वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः । उपचारमात्रन्तु भक्तिः।

**प्रश्न ६ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत।** १०

१ ध्वनेः लक्षणं सविस्तरं वर्णयत ।

२ भक्तिः ध्वनेः लक्षणं नास्ति इति ग्रन्थानुसारं प्रतिपादयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधोलिखिताभ्याम् एकां कारिकां ससन्दर्भं स्पष्टयत।** ५

१ उक्त्यन्तरणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।
शब्दोव्यञ्जकतां विभद् ध्वन्युक्तेर्विषयीभवेत्॥

२ मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः॥

**प्रश्न ८ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत।** १०

१ ध्वनिसन्दर्भे अनिर्वचनीयवादिनां मतं विवेचयत।

२ कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम् इत्युक्तिं यथाग्रन्थं विवेचयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ ध्वन्यालोकस्य प्रथमकारिकायाः छन्दः किम्?

२ आचार्यः आनन्दवर्धनः केन उपाधिना विभूषितः?

३ ध्वन्यालोककारः कस्य मनः प्रीतये ध्वने: स्वरूपं वर्णयति ?

४ आदिकवि: क: ?

५ करुणरसस्य स्थायिभावः कः?

६ ध्वन्यालोकस्य मङ्गलाचरणं लिखत।

७ उपोढरागेण विलोलतारकं तथा गृहीतं राशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्।
इत्यत्र कोऽलङ्कारः?

८ ध्वनेः प्रकारौ लिखत।

९ सर्वविद्यानां मूलं किम्?

१० ध्वन्यालोकस्य प्रथमे उद्योते कति कारिकाः सन्ति?

११ आनन्दवर्धनस्य समयः कः?

१२ ध्वन्यालोकस्य प्रसिद्धा टीका का?

१३ कोऽर्थः शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते?

१४ ध्वन्यालोके कति उद्योताः सन्ति?

१५ अविवक्षितवाच्यध्वनेः उदाहरणं लिखत।